श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीतं

# ॥ श्री प्रपन्नमकरन्दस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री प्रपन्नमकरन्दस्तोत्रम् ॥

कलयतु कुशलानि कालमेघ -
    द्युतिमदधूननधीरदिव्यकान्ति।
किमपि रघुकुलाम्बुराशिरत्नं
    सकलशुभावहनाम तच्चिरत्नम्॥ 1 ॥

घनतरकरुणामृताम्बुराशि -
    प्रसरदुदारतरङ्गकैरपाङ्गैः।
प्रशमितविनताळिचित्ततापं
    किमपि महो हृदि मेऽस्तु दिव्यरूपम्॥ 2 ॥

विविधमणिमरीचिजाललीला -
    शबलितहेमकिरीटलोलमालम्।
मृगमदतिलकस्फुरन्निटालं
    हृदय सदा भज कोसलेन्द्रबालम्॥ 3 ॥

विमलकिरणबाललीलफाल -
    प्रतिलुलितालकजाललालनीयम्।
नवनलिनदलामलायताक्षं
    कमपि वशे कलयानि दीनरक्षम्॥ 4 ॥

सुललितचलितातिविभ्रमभ्रू -
    कलनविलोलितभूसुरान्तरङ्गे।
मुकुरतललसत्कपोलभावे
    लगतु चिरं मम चित्तमादिदेवे॥ 5 ॥

मणिगणरुचिराङ्गकुण्डलश्री -
कवचितकर्णयुगे मनोज्ञनासे।
विहरतु मम चित्तवृत्तिरेषा
धरणिसुतावशगे चिराय धाम्नि॥ **6** ॥

रसभरपरिपाकराजमान -
स्फुटतरदाडिमबीजदन्तपङ्क्तिम्।
अधरमणिसुधाविधूतसीता -
हृदयजतापमुपास्महे पुमांसम्॥ **7** ॥

शरदुदितसुधाकरांशुशैली -
मदहरशीतलवाचि सुप्रसन्ने।
अरुणकिरणभिन्नपद्मलक्ष्मी -
विजयिनि राममुखेऽस्तु मानसं मे॥ **8** ॥

दरदळदरविन्दमन्दमन्द -
प्रसरदमन्दमरन्दसुन्दराङ्गाः।
विवशितधरणीसुतान्तरङ्गा
रघुनृपतेः प्रसरन्तु मय्यपाङ्गाः॥ **9** ॥

अमृतरुचिसहोदरस्मितश्री -
जुषि घनकम्बुविडम्बिकन्धरेऽस्मिन्।
सितकरकिरणात्युदारहारे
मम हृदयं भवताद्विहारि वीरे॥ **10** ॥

करकमलगळन्मरन्दधारा -
विशयवदावददिव्यचापदण्डम्।
अशिशिरकरवंशजाग्रगण्यं
विशतु मनो मम धन्विनां वरेण्यम्॥ **11** ॥

निशिचरकुलकल्पितोग्रदण्डं
मनसि महो मम भासतामखण्डम्।
अरिसरसिजधूननातिशौण्ड -
द्विरदकरायितदीर्घबाहुदण्डम्॥ **12**॥

मरकतहरिनीलपद्मराग -
स्फुरितमहाङ्गदकङ्कणादिसेव्यम्।
मम नयनपथेऽस्तु वस्तु दिव्यं
शुभहरिचन्दनचर्चनातिभव्यम्॥ **13**॥

नवतरुणिमजानकीमनोज्ञ -
स्तनयुगकर्कशतारसज्ञवक्षः।
किमपि सकललोकभागधेयं
मयि विशताच्छुभदायि नामधेयम्॥ **14**॥

नवजलधरबृन्दतुन्ददीव्य -
त्तटिदुपमानसुवर्णचारुचेलम्।
त्रिवळिसुललितोदरं सुशीलं
रघुकुलरत्नमुपास्महेऽतिनीलम्॥ **15**॥

कमलजजनिगेहनाभिपद्म -
स्फुटरसलोलुपरोमभृङ्गराजि।
हृदि परिकलयामि कोसलेन्द्र -
क्षितिरमणीमृगनाभिचित्रकं तत्॥ **16**॥

मृगपतितनुमध्यमुन्नतांसं
सुविपुलपीवरदिव्यबाहुमध्यम्।
विधुकररुचिरान्तरीयमीडे
कमपि युवानमुदारचारुमूर्तिम्॥ **17**॥

तरुणिममदनेभयुग्मलीला -
प्रसृतकरद्वयसन्निभोरुयुग्मम्।
सुमशरजयकाहळायमान -
स्फुटतरजङ्घमहं भजामि देवम्॥ **18**॥

शरणगजनचित्तभक्तिपूर -
हृदकमलाद्वितयं तदङ्घ्रियुग्मम्।
मृदुलशुभतराङ्गुळीमनोज्ञं
रुचिरनखं परिचुम्बतान्मनो मे॥ **19**॥

रघुकुलमणिदिव्यसौधदीपं
सुरुचिररूपविधूतपुष्पचापम्।
घनतरमदताटकास्वरूप -
ज्वलनशिखाजलदं भजेऽभिरूपम्॥ **20**॥

चरणनखपरागजातकन्या -
वितरणमोदितगौतमातिमान्ये।
विलगतु हृदयं महावदान्ये
नवतरुणे मम भूसुताप्तिधन्ये॥ **21**॥

जनकवचनपालनात्तशिक्षे
भरतमनोरथदायिदिव्यवीक्षे।
विपिनभुवि विराधदत्तशिक्षे
सततमियं मतिरस्तु दीनरक्षे॥ **22**॥

जरठतमजटायुमुक्तिदान -
प्रकटितनैजमहावदान्यभावे।
कपिकुलपतिकॢप्तमित्रभावे
विहरतु मे हृदयं चिराय देवे॥ **23**॥

सरिदधिपतिमध्यबद्धसेतु -
    च्छलपरिदर्शितवैरिधूमकेतुः।
दशवदनविधूननैकहेतु -
    र्हृदि नटताद्रघुवंशदिव्यकेतुः॥ **24** ॥

रघुकुलधरणीशराज्यसिंहा -
    सनलसितं धरणीसुतात्तभावम्।
शुभतमकरुणानिधिं भजाम -
    स्सकलगुणाकरमेनमादिदेवम्॥ **25** ॥

वितरतु जगतां शुभानि कृष्णा -
    भिधपरकालयतीश्वरेण क्लृप्ता।
स्तुतिरिह महिशूरराजधानी -
    नृपमणिकृष्णमहेन्द्रदेशिकेन॥ **26** ॥

॥ श्री प्रपन्नमकरन्दस्तोत्रं समाप्तम्॥